1

२

यामुत्तरांतस्यैत्यादित आह यथाश्रुतमिति इदमेतल्लक्षणत्रयम् ननु हेतुमद्राभासं तेष्विति मूलस्य हेत्वाभासपदस्य दुष्टहेतुपरत्वा
त् दुष्टहेतुनिरूपणस्यैव प्रतिज्ञातत्वात् तल्लक्षणम् प्राकाहिनमतस्तदन्तो मूलस्य न्यूनता अन्यथा विधमूलस्य हेत्वाभासपदस्य
हेतुदोषपरत्वे हेत्वाभासे तेष्वित्यादिनादुष्टहेतूनां विभजनात् दुष्टहेतुनिरूपणस्याप्रतिज्ञातत्वे तदसंगतिः एवं दुष्टहेतुनिरूपण
स्याप्रकृतत्वे दुष्टहेतूनां विभागानन्तरं यासंकरेण विभागव्याघातशंकाया अनवतारात् उपधेयसंकरेऽपीत्यादिग्रन्थ
स्य उपाध्यसंकरेण विभागोपपादनस्यासंगतिरित्यत आह तद्वत्त्वं चेति तद्वत्त्वं च तादृशदोषवत्त्वं चेत्यर्थः दुष्टहेतू
नां लक्षणानि समनुपज्य ते स्फुटमिति शेषः तथा च दुष्टहेतुनिरूपणस्य प्रकृतत्वेऽपि दोषलक्षणे कृते दुष्टहेतुल
क्षणस्य स्फुटतया लाभेन दोषलक्षणाभिधानस्य तत्र तात्पर्यान्नोक्तानुपपत्तिरिति भावः तदभिप्रायेणैवेति
दुष्टहेतुलक्षणाभिप्रायेणैवेत्यर्थः अनुमितिपदस्य अनुमितिसामान्यपरत्वेऽसंभवात् यत्किंचिदनुमितिप
रत्वे चातिप्रसंगात् प्रकृतपक्षसाध्यहेतुकानुमितिपरत्वमावश्यकं तथा च व्यभिचारादावव्याप्तिः वह्निधू
मव्यभिचारीति ज्ञानाभावस्य पर्वतो धूमवानित्याद्यनुमितिजनकत्वात् लक्षणघटकतया तस्य तादृशानु
मितिकारणज्ञानमात्रपरत्वे बाधादावव्याप्तिः बाधादिज्ञानस्य परामर्शाविरोधित्वादतोऽनुमितिपदमजहत्स्वार्थल
क्षणयानुमेयपरतया व्याचष्टे तत्रेति तादृशलक्षणवाक्य इत्यर्थः लक्षणघटकतावच्छेदकमुभयसाधारणम
नुगतरूपमाह अनुमितिनिष्ठकार्यतानिरूपकसंबंधित्वेनेति अनुमितिपदस्य प्रकृतपक्षतावच्छेदकविशि
ष्टप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारकप्रकृतहेतुतावच्छिन्नहेतुकानुमितिपरत्वं स्वयमेव दर्शयिष्यते
न तद्व्यभिचारादावतिप्रसंगः निरूपकत्वं चात्र प्रतियोगित्वं यद्धितदकार्यस्य कार्यताप्रतियोगित्वाभावादनुमित्यसंब

[illegible] प्रसाध्यके यद्धेतुकानुमिति स्थले दोषाभावो नेष्यते तत्र [illegible] छेदकार एवं अनुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकेताश्रयपदार्थ
[illegible] प्रकृतहेतुकानुमितिप्रकृतानुमिति [illegible] सौ त्वविषयत्वे [illegible] पर्यवसन्नं तथा चासंभवः २

[illegible] वह्निप्रकारकपर्वतविशेष्यकबुद्धेः प्रतिबंधकत्वेन तद्विषयत्वस्य वह्न्यभावविशिष्टपर्वतेः [illegible] तदा पर्वतो वह्न्यभाववान् [illegible] वह्न्यभावप्रकारक
[illegible] पर्वते स च्छेनातिप्रसंगः ८

बाधे हेत्वाभासे [illegible] प्रसंग: एक [illegible] नमुपरले [illegible] श्री स्मारकमितिनये हेत्वाभासस्य स्मृतत्वात्। स हेतुरसे व्यभिचारि हेत्वाभासस्य
[illegible] धर्मत्वोभयाभाववत्त्वे सैव धीर्बोधकम्॥ ३ वह्निमानिति ज्ञानमप्रमा प्रदुष्टहेतुजन्यप्रतिबंधकीभूतवह्न्यभाव [illegible] प्रमेयत्वज्ञानसङ्गावकालीनत्वा

[illegible] हेत्वाभासनिरूपणेपि प्रसंगस्यापि संगतित्वं संभवति व्याप्तिपक्षधर्मताविशिष्टहेतुनिरूपणोसति व्याप्तिपक्षधर्मताविरोधितद्विरहवतो दुष्टहे
तोः स्मरणादतस्तत्प्रदर्शकम्। तस्यापि न तत्परिजिहीर्षुः प्रसंगस्यापि तन्निरूपणप्रयोजकत्वमाह एतावतेति परिकरो व्याप्ति
पक्षधर्मते निरूपितेसति उक्तक्रमेण दुष्टहेतोः स्मृततत्वस्य प्रसंगसंगतिनिर्वाहकस्य लाभाय तत्प्रसंगादिति सपरिकरहेतुनिरूपि
तप्रसंगसंगतेरित्यर्थः तत्त्वज्ञानजन्यजिज्ञासाधीनत्वं पंचम्यर्थः अन्वयश्चास्यानिरूपणमिसनेन तत्त्वनिर्णयविजयप्रयोजकत्वादिति
तम्। प्रकृते हेत्वाभासनिरूपणस्य तत्त्वनिर्णयादिजनकज्ञानविषयत्वार्थकतया [illegible] उपयोगिनिरूपणघटकज्ञानप्रयोजनप्रदर्शनपरं तथापि
[illegible] परत्वे संगत्यप्रदर्शनेन न्यूनतास्यादिति तस्यैककार्यकारित्वरूपसंगतिप्रदर्शनपरत्वमपि स्फुटीकर्तुमाह तत्त्वनिर्णयादिति आक्षेप
[illegible] तत्कार्यकारित्वादिति सपरिकरहेतुप्रयोज्यकार्यप्रयोजकत्वात् प्रयोजकत्वं च जनकजनकतावच्छेदकसाधा
[illegible] स्वविषयकज्ञानकार्यं प्रति स्वस्य तथात्वमुक्तमेव तत्त्वनिर्णयः प्रमितकोटिनिर्णयः तत्र व्याप्तिपक्षधर्मताविशि
[illegible] हेतुज्ञानमिव तद्विपरीतकोटिसाधकहेतोः हेत्वाभासत्वज्ञानमप्युपयुज्यते प्रतिबंधकीभूतविपरीतकोटिव्याप्यवत्ता
[illegible] ग्राहकत्वादिस्मृभयोस्तत्त्वनिर्णयप्रयोजकत्वं अथवा तत्त्वनिर्णयः साध्यवत्ताज्ञाने प्रमात्वनिर्णयः
तत्रानुमापकहेतोः व्याप्त्यादिविशिष्टरूपसद्धेतुत्वज्ञानमिव विपरीतसाधकहेतोः दुष्टत्वज्ञानमप्युपयुज्यते प्रकृतसाध्यव
[illegible] ज्ञानप्रमात्वग्राहकविपरीतहेताव दुष्टत्वग्रहविघटकत्वात् विजयप्रयोजकत्वं च हेत्वाभासस्य स्वज्ञानाधी
न [illegible] हेतुदोषोद्भावनद्वारा व्याप्त्यादिविशिष्टहेतोश्च स्वज्ञानाधीनसमायप्रयोगद्वारा बोध्यम्। मूले कलत्वं
[illegible] हेतुपदं तेषां प्रति व्याप्तिः यथार्थज्ञानविषयानुमितिप्रतिबंधकतावच्छेदकविषयताश्रयत्वपर्यंतस्य समूहालंब
नविषयताश्रयोदासीनपदार्थवारणाय प्रथमलक्षणे विरुद्धीभूतया बाधादिज्ञानप्रतिबंधकतायां प्रायशो हेतुवि
षयताया अनवच्छेदकत्वात् तत्र हेतावव्याप्तिरित्यत यद्विषयत्वेनेत्यादि लक्षणान्तरं नीजायाप्रवच्छेदकत्वार्थकत

[illegible] निश्चयत्वभावत्व [illegible]
[illegible] आप्ति: ३ वायुर्धूमवान् रूपादित्यत्र [illegible] धर्मसमन्वयं [illegible] विषयत्वविषयत्वविरहानुलदद्या विषयत्वस्यस्य [illegible] द्रोहेवह्न्यभाववान्घटश्चेतिसमूहालं
[illegible] कहेतोः [illegible] संगतिश्च [illegible] आप्ति: २ ३ [illegible] विषयताश्रयोदासीनेघटपसर्ह

२

…तावच्छेदकतापर्य्याप्त्यधिकरणीभूतपर्वतत्वा ५ तेजस्त्वे वह्न्यत्वे स्वत्वे प्रतीतिः … बाधस्थाने … कत्वात् ५ … मितेरपि तादृशसाध्यनिष्ठप्रकारताशा…
…विशिष्यतानिरूपितेत्यादिपर्य्यवसन्नम् २ काञ्चनवह्निमान् काञ्चनवह्नि… व्याप्यधूमवांश्च … स्थले … मोनि … भावात् … तिमावः ५
तेन … काञ्चन … वह्निरिति … विषयक … भावाद …

अधिकरणत्वम्। तेनातेजस्वी पर्वतो वह्निमानित्यादौ विशिष्टपर्वतत्वादिमति वह्न्यभावरूपबाधस्य काञ्चनमयः
पर्वतो वह्निमानित्यादावाश्रयासिद्धेश्च शुद्धपर्वतत्वावच्छिन्नपक्षकानुमित्यविरोधित्वेपि नासंग्रहः एवमग्रे
पि बोध्यम्। साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारकत्वानिवेशे परामर्शाविरोधितया बाधसत्प्रतिपक्षयोर्व्याप्तेः
तन्त्रकृतेस्साध्यतावच्छेदकावच्छिन्नत्वानुपादानेपि तद्धेतुतादवस्थ्यं वह्नित्वावच्छिन्नाभावादिनिश्चयस्य
धूमजनकतेजस्त्वी वह्निव्याप्यधूमवांश्चायं ह्रद इत्याद्यनुमितेः प्रतिबंधकत्वात्। यत्तु साध्याप्रसिद्ध्या व्यभिचारसा
…जनकत्वे तदुपादानस्य तत्तु न सत्। वह्निर्नकाञ्चनमय इत्यादिनिर्णयस्य पक्षे शुद्धवह्नित्वादिना वह्न्याद्यनुमि
त्यविरोधित्वेपि द्वितीयपक्षे साध्यतावच्छेदकावच्छिन्नाभावसत्त्वात्तस्य काञ्चनमयवह्निव्याप्यधूमवान्पर्वत इत्यनुमि
ति विरोधितया तत्र तल्लक्षणागमनात् द्वितीयदलप्रवेशात् व्यभिचारविरोधसाधनाप्रसिद्धिस्वरूपासिद्धिषु नाव्याप्तिः तत्रापि सा
…वच्छिन्नानिरूपितव्याप्तिविशिष्टत्वनिवेशात् व्यभिचारविरोधयोर्नाव्याप्तिः वह्निर्धूमव्यभिचारीति ज्ञानदशायामपि द्र
व्यत्वादिना धूमादिनिरूपितव्याप्तिज्ञानसंभवात् तद्धेतुतादवस्थ्यमतो व्याप्तौ साध्यतावच्छेदकावच्छिन्नीयत्वनिवेशः स
न्व्ययव्याप्तिव्यतिरेकव्याप्तिविशिष्टोपादाय तदुभयप्रकारकत्वमेव निवेश्यं एकतरमात्रव्याप्त्युपादाने साधारण्यानुप
संहारित्वयोरेकतरासंग्रहप्रसंगात् इत्यग्रे व्यक्तीभविष्यति तादृशव्याप्तिद्वयप्रकारतानिरूपितहेतुप्रकारता चास्तत्सहचरित
…कत्वे हेतुकानुमितिजनकतावच्छेदकप्रकारतात्वेनानुगमय्य निवेशनेतु न संभवति साध्याभाववद्वृत्तित्वज्ञानदशायां के
वलव्यतिरेकव्याप्त्यादिप्रकारकहेतुमत्ताज्ञानोत्पत्त्या साधारण्यादेस्तादृशप्रकारताशाल्यनुमितिसामान्यविरोधित्वा
भावात्। व्याप्तिविशिष्टविषयकत्वमात्रस्य न द्विविधहेतुतावच्छेदकावच्छिन्नविषयकत्वमात्रस्य वा निवेशे स्वरूपासिद्ध्या

तथा निवेशे च बाधादोषपरामर्शनिष्ठताद्दृशग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकताश्रयज्ञानविषयत्वाभावेन व्यभिचारादे
चानुमितिप्रतिबंधकत्वानविषयत्वाभावेन ताद्दृशग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकताश्रयज्ञानविषयत्वाप्रसि
अनुमितिपरामर्शकोट्यप्रसंगः
अयं सम्भवः ५

९ः अतः तेषां विषयं सर्वेषां विषयसाधारण्यस्य तेषां ग्राह्याकारजनकसाक्षात्कारविषयत्वात्मकनिरूपकत्वस्य लाभा
य अस्तु पर्वतो वह्निमान् धूमवत्त्वादिति समूहालंबनानुमितिविरोधिह्रदनिष्ठवन्ह्यभावादिरूपबाधे
पर्वतादौ धूमादिना वह्न्यादिसाधने दोषताप्रसंगः प्रकृतानुमितिनिष्ठकार्यतानिरूपकसंबंधेन ग्रहत्वस्य
कस्यापि प्रतिबध्यतानवच्छेदकतया तदवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतानिवेशासंभवात् तथापि
ध ग्रहत्वव्यापकप्रतिबध्यतानिवेशे चानुमितित्वविरोधिनि व्यभिचारादिदोषपरामर्शविरोधिनि बाधादौ चाव्याप्ति
... विरोधिनि पक्षे सिद्ध्यादावेव ताद्दृशप्रतिबध्यतानिरूपकज्ञानविषयत्वसत्त्वात् अतः कल्पांतरमाह साध्य
... इति प्रकृतपक्षतावच्छेदकविशिष्टे पक्षे प्रकृतसाध्यतावच्छेदकावच्छिन्नत्वावगाहि विशिष्टप्रकृतहेतुतावच्छेदका
... प्रकारकानुमितिसामान्यपरं एवं च ताद्दृशसमूहालंबनानुमितेर्धर्म्यादिविषयकत्वतया व्यभिचारादिप्रतिब
... ताद्दृशानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकताशालियथार्थज्ञानविषयत्वं पर्यवसिता र्थः
... साध्यतावच्छेदकावच्छिन्नप्रकारकानुमितिसामान्यांतर्गतायां पर्वतो वह्निमान् वह्निव्याप्यधूमवांश्चेत्याद्य
नुमितौ ह्रदो वह्न्यभाववानित्यादिनिश्चयस्याविरोधित्वान्नातिप्रसंगः इति भावः बाधसत्प्रतिपक्षस्वरूपासिद्ध्यादि
... व्याप्तिवारणाय प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यत्वस्य निवेशः ह्रदत्वादिना ह्रदादिविशेष्यकानुमितौ त
... विषयनिश्चयस्याविरोधित्वात् तद्रूपेण तादृशस्य मते पक्षतावच्छेदकावच्छिन्नत्वोपादाने अवच्छेदकत्वं च तत्पर्या
... ह्रदो वह्निमान् धूमादित्यादौ पक्षतावच्छे समूहालंबनानुमितिः वह्निमान् ह्रदो वह्निव्याप्यधूमवांश्चेत्याकारकाहार्यानुमितिकोटिप्रविष्टेन प्रतिबध्यत्वाव्याप्तिः ७
... विशिष्टं ... प्रसिद्धो समन्वयः ३
... मितिविशिष्टज्ञानविषयत्वात् पक्षतावह्निमान् ह्रदः स्वावच्छिन्नाकारकाहे २ द्रव्यवह्निमत्ह्रदः ह्रदत्वादि ह्रदत्वेन ह्रदविशेष्यकानु